योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ००१

< योगवासिष्ठः | प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)

प्रथमः सर्गः १

श्रीराम उवाच ।

नैष्कर्म्यात्कल्पनात्यागात्तनुः पतति देहिनः ।

कथमेतदतो ब्रह्मन्संभवत्याशु जीवतः ।। १

श्रीवसिष्ठ उवाच ।

जीवतः कल्पनात्यागो युज्यते न त्वजीवतः ।

रूपमस्य यथातत्त्वं श्रृणु श्रवणभूषणम् ।। २

अहंभावनमेवाहुः कल्पनं कल्पनाविदः ।

नभोर्थभावनं तस्य संकल्पत्याग उच्यते ।। ३

पदार्थरसमेवाहुः कल्पनं कल्पनाविदः ।

नभोर्थभावनं तस्य संकल्पत्याग उच्यते ।। ४

इदं वस्त्विति संवेगमाहुः कल्पनमुत्तमाः ।

नभोर्थभावनं तस्य संकल्पत्याग उच्यते। ।। ५

स्मरणं विद्धि संकल्पं शिवमस्मरणं विदुः ।

तच्च प्रागनुभूतं च नानुभूतं च भाव्यते ।। ६

अनुभूतां नानुभूतां स्मृतिं विस्मृत्य काष्ठवत् ।

सर्वमेवाशु विस्मृत्य गूढस्तिष्ठ महामते ।। ७

सर्वास्मरणमात्रात्मा तिष्ठायातेषु कर्मसु ।

अर्धसुप्तशिशुस्पन्द इवाभ्यस्तोपपत्तिषु ।। ८

निःसंकल्पप्रवाहेण चक्रं प्रस्पन्दते यथा ।

स्पन्दस्वकर्मस्वनघप्राक्संस्कारवशात्तथा ।। ९

अविद्यमानचित्तस्त्वं सत्त्वसंस्कारमागतः ।

प्रवाहपतितेष्वेव स्पन्दस्व स्वेषु कर्मसु ।। १०

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।

असंकल्पः परं श्रेयः स किमन्तर्न भाव्यते ।। ११

अहो मोहस्य माहात्म्यं यदयं सर्वदुःखहा ।

चिन्तामणिर्विचाराख्यो हृत्स्थोऽपि त्यज्यते जनैः ।। १२

अवेदनमसंकल्पस्तन्मयेनैव भूयताम् ।

एतावत्परमं श्रेयः स्वयमेवानुभूयताम् ।। १३

किल तूष्णीं स्थितेनैव तत्पदं प्राप्यते परम् ।

परमं यत्र साम्राज्यमपि राम तृणायते ।। १४

गम्यदेशैकनिष्ठस्य यथा पान्थस्य पादयोः ।

स्पन्दो विगतसंकल्पस्तथा स्पन्दस्व कर्मसु ।। १५

सर्वकर्मफलाभोगमलं विस्मृत्य सुप्तवत् ।

प्रवाहपतिते कार्ये स्पन्दस्व गतवेदनम् ।। १६

स्पन्दस्वाकृतसंकल्पं सुखदुःखान्यभावयन् ।

प्रवाहपतिते कार्ये चेष्टितोन्मुक्तशष्पवत् ।। १७

रसभावनमन्तस्ते मालं भवतु कर्मसु ।

दारुयन्त्रमयस्येव परार्थमिव कुर्वतः ।। १८

नीरसा एव ते सन्तु समस्तेन्द्रियसंविदः ।

आकारमात्रसंलक्ष्या हेमन्तर्तौ लता इव ।। १९

बोधार्कपीतरसया स्पन्दन् षड्वर्गसत्तया ।

यन्त्रस्पन्दोपमस्तिष्ठ वल्ल्येव शिशिरे द्रुमः ।। २०

चिदान्तररसान्येव प्रवृत्तान्यपि धारय ।

स्वयत्नेनेन्द्रियाण्याशु हेमन्तर्तुस्तरूनिव ।। २१

सरसेन्द्रियवृत्तेस्ते कुर्वतोऽकुर्वतस्तथा ।

संसारानर्थसार्थोऽयं न कदाचन शाम्यति ।। २२

निःसंकल्पमरुज्ज्वालायन्त्राम्बुस्पन्दवद्यदि ।

स्पन्दसे तदनन्ताय श्रेयसे परिकल्पसे ।। २३

एतदेव परं धैर्यं जन्मज्वरनिवारणम् ।

यदवासनमभ्यस्ता निजकर्मसु कर्तृता ।। २४

अवासनमसंकल्पं यथाप्राप्तानुवृत्तिमान् ।

शनैश्चक्रभ्रमाभोग इव स्पन्दस्व कर्मसु ।। २५

मा कर्मफलबुद्धिर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।

उभयं वा त्यजैतत्त्वमुभयं वा समाश्रय ।। २६

बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते ।

संकल्पनं मनोबन्धस्तदभावो विमुक्तता ।। २७

नेह कार्यं न वाऽकार्यमस्ति किंचिन्न कुत्रचित् ।

सर्वं शिवमजं शान्तमनन्तं प्राग्वदास्यताम् ।। २८

पश्यन्कर्मण्यकर्मत्वमकर्मणि च कर्मताम् ।

यथाभूतार्थचिद्रूपः शान्तमास्व यथासुखम् ।। २९

अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमम् ।

अत्यन्तं तन्मयो भूत्वा तथा तिष्ठ यथासि भोः ।। ३०

समे शान्ते शिवे सूक्ष्मे द्वैतैक्यपरिवर्जिते ।

ततेऽनन्ते परे शुद्धे किं केन किल खिद्यते ।। ३१

नोदेतु त्वयि संकल्पो मरुभूमाविवाङ्कुरः ।

इच्छा नोदेतु भवति लतिकेवोपलोदरे ।। ३२

अवेदनस्य शान्तस्य जीवतो वाप्यजीवतः ।

नेह किंचित्कृतेनार्थो नाकृतेनापि कश्चन ।। ३३

यत्कर्माकर्म शान्तेऽन्तः शाश्वताभेदरूपिणि ।

न कर्मणि च कर्माणि न कर्तर्यपि कर्तृता ।। ३४

अहंममेति संविदन्न दुःखतो विमुच्यसे ।

असंविदन्विमुच्यसे यदीप्सितं तदाचर ।। ३५

अहं ममेति नास्त्यलं यदस्ति तच्छिवं परम् ।

परात्परं त्विदं शिवादशब्दमर्थरूपकम् ।। ३६

यद्दृश्यते जगदिदं खलु किंचिदेत-

द्हेम्नोऽङ्गदत्वमिव भाति न विद्यमानम् ।

अस्य क्षयं विदुरवेदनमेव पश्चा-

त्सत्यं तदेव परमार्थमथावशिष्टम् ।। ३७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे इच्छादिचिकित्सायोगोपदेशो नाम

प्रथमः सर्गः ।। १ ।।